Sri Kantha Sivacharya

Vyas sutriya bhrahma mimansa Saiva bhasya - chapter 1-3 Pt.

ব্যাস সূত্রীয় ব্রহ্ম মীমাংসা শৈব ভাষ্য - প্রথম অধ্যায় - তৃতীয় পাদ

Sanskrit

Paper - Handwritten

1946 sambat (129 years old)

20 Folio

11.8" X 6"

Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः ॐ श्रीमत्सद्गुरुशंकरेंद्रचरणद्वंद्वंप्रणम्यादराच्छ्रीमद्विश्वपतिंचवंदे॥
गणपंध्यात्वानन्तपूर्णांऽबिकां श्रीमद्व्यासनिरूपितोत्तममहासूत्रीयभाष्योत्तमं श्रीकंठीयम
हंलिखाम्यनितरां मत्त्वोऽभ्रेमद्गतिः १ ॐ अथवेदांतसूत्रशैवभाष्यप्रथमाध्यायस्यतृतीयपा
दारंभः इहपादेस्पष्टब्रह्मलिंगानांवेदांतवाक्यानांविचारः प्रसंगादधिकारिनिरूपणंचक्रि
यते॥ ॥द्युभ्वाद्यायतनंस्वशब्दात्॥१॥ ॥यस्मिन्द्यौः पृथिवीचांतरि
क्षमोतंमनः सहप्राणैश्चसर्वैस्तमेवैकंजानथ आत्मानमन्यावाचोविमुंचथअमृतस्यैषसे
तुरिति॥ अस्यविषयः श्रूयतेमुंडकोपनिषदि अत्रश्रुतौद्युभ्वाद्याधारतयाश्रूयमाणः १ परमे १
श्वरादन्योवायुरेवद्युभ्वाद्याधारइतिगम्यते॥ वायुनावैगौतमसूत्रेणायंचलोकः परश्चलोकः
सर्वाणिचभूतानिसंदृब्धानिभवंति॥ इतिश्रुतौतस्यसर्वाधारत्वप्रसिद्धेः॥ इतिप्राप्ते २ ब्रूमः॥ परमे

१ श्रूयमाणः परमेश्वरादन्योवेतिसंशयः॥ एवंसतिइतिपा०॥ २ श्रुतेस्तस्यसर्वाधारत्वप्रसिद्धेरितिप्राप्तेइति
पा०॥ ३ स्वायतनत्वेनश्रूयते॥ कुतः इतिपा०॥ ४ शब्दश्रवणात् इतिपा०॥ ५॥ व्यपदेशाच्चेति इतिपा०

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्वर एव द्युभ्वाद्यायतनं ॥ तमेवैकं जानीथ आत्मानमित्यात्मशब्दात् ॥१॥ ॥ सूत्रात्मनो
वायोरप्यात्मशब्दवाच्यत्वे को दोष इत्यत आह ॥ ॥ मुक्तोपसृप्यव्यपदेशात् ॥२॥ ॥
यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदा विद्वान् पुण्यपापे विधूय निरंजनः
परमं साम्यमुपैति ॥ यथा नद्यः स्यंदमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वा
न्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं ॥ ॥ इति पुण्यापुण्यप्रहाननामरूपविनिर्मुक्ता
नां मुक्तानां प्राप्यतया व्यपदेशाद्वायं परमेश्वर एव । कथमेतद्वायोः संभवति । परमेश्वरात्मक
एव वायुः सूत्रात्मा । परमेश्वरो ह्यष्टासु मूर्तिष्वेकतमात् । ततो न वायुरिति निर्णयः ॥२॥ ॥
नानुमानमतच्छब्दात् प्राणभृच्च ॥३॥ ॥ अनुमानगम्यं प्रधानमेव द्युभ्वाद्यायतनं । तस्य स
र्वोपादानत्वात् । इति न वाच्यं । अतच्छब्दात् । आत्मशब्दात् । न प्राणभृज्जीवश्च । अनुपपत्तेरि

त्यगच्छन् गच्छतीति वत्सार्थे गच्छन्तीति ह्रस्वः प्रयोगः ॥ शंकरमते प्राणभृच्च इति पृथक् सूत्रं १ पुण्य
निर्मुक्तानां इति पा० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय शैवभाष्यं २

ति॥३॥ ॥भेदव्यपदेशात्॥४॥ ॥ अत्रेश्वरस्य जीवाद्भेदो व्यपदिश्यते॥ समाने वृ
क्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशं तदास्य महिमानमेति
वीतशोकः॥ ॥इति। अतः सतः परमेश्वरस्य द्युभ्वाद्याधारः॥४॥ ॥प्रकरणात्॥५॥
अथ परा यया तदक्षरमधिगम्यते॥ इति परस्य खल्विदं प्रकरणं। अतश्च परमेश्वरः॥५॥ ॥
स्थित्यदनाभ्यां च॥६॥ ॥द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। तयोरन्यः
पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति॥ ॥इति जीवस्य कर्मफलादनमुक्त्वा अन
अतएव दीप्यमानस्याभिधानाच्च। तस्माद्दर्थान्तरभूतः¹ परमेश्वर एव द्युभ्वाद्यायतनमिति निर्ण २
यः॥६॥ अनेकधामतया हि प्रतिपादितस्य परमेश्वरस्य प्राप्तिप्रयोजनं निरतिशयसुखं दर्शयति॥
॥ ॥भूमा संप्रसादादध्युपदेशात्॥७॥ ॥छांदोग्ये श्रूयते। स्य विषयः। छांदोग्ये भूमैव

१ अतः संसारिणोऽर्थान्तरभूतः इतिः पा०॥ २ त्कुमारोऽस्तीति नामादीनि निर्दिश्य इति पा०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सुखमित्युक्त्वा भूम्नः स्वरूपमाह॥ यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा
॥ इति॥ तदत्र संदेहः॥ भूमशब्दनिर्दिष्टः परमेश्वरस्तदन्यो वेति॥ परमेश्वरादन्यः प्राण एव भूमा॥
पूर्वप्रश्नमालिकान्तेषु॥ अस्ति भगवो भूय॥ इत्यादिना नारदप्रश्नेषु सनत्कुमारेण॥ वाग्वाव नाम्नो भू
यसी॥ इत्यादिना वागादीनि निर्दिश्य प्राणस्योपरि प्रश्नप्रवृत्त्यभावान्निर्णयतो भूमानमवधा
रयति॥ न परमेश्वरस्तत्र प्रसक्तः॥ अतो भूमा प्राण इति प्राप्ते ब्रूमः॥ अत्र परमेश्वर एव भूमशब्दनि
र्दिष्टः॥ संप्रसादादध्युपदेशात्॥ संप्रसादो जीव उच्यते॥ अथ य एष संप्रसाद॥ इति श्रुतेः॥ स
चात्र प्राणशब्देन निर्दिश्यते॥ तस्मादूर्ध्वमर्थान्तरत्वेन भूमोपदिश्यते॥ एष तु वा अतिवदति
यः सत्येनातिवदतीति॥ इत्यादिना॥ अत्र हि पूर्वं एवा एष एवं पश्यन् एवं मन्वान एवं विजान
न् इत्यतिवादिनः सत्यातिवादिन आधिक्यप्रदर्शनात् पूर्वातिवादनिमित्तात् प्राणादेतदतिवाद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

निमित्तस्य सत्यशब्दाभिधेयस्याधिक्यमवसीयते । स एवाग्रेऽमृगुणविशिष्टः प्रतिपाद्यते ॥ अ
थात आत्मादेश ॥ इत्यात्मत्वेनाप्यग्रे वर्ण्यते । अतः प्राणशब्दनिर्दिष्टाज्जीवादधिक आत्मा भू
मा परमेश्वर एव २ ॥ ७ ॥ ॥ धर्मोपपत्तेश्च ॥ ८ ॥ ॥ स भगवः कस्मिन्प्रतिष्ठितः । स्वे महिम्नि
॥ इत्यादिना ३ स्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वकारणत्वादयो धर्मा उपदिश्यंते । तेषां परमेश्व
र एवोपपत्तिः । न प्राणशब्देरिते ४ जीवे । ततः परमेश्वर एव भूमा नापर इति सिद्धं ॥ ननु पूर्वत्रा
धिकरणे ॥ निरंजनः परमं साम्यमुपैति ॥ इति मुक्तानां ब्रह्मसादृश्यमभिहितं । ततो ब्रह्मणः
सायुज्यमुपगता मुक्तात्मानस्तत्तथाभूता वर्तंत इति । अत्र ॥ नान्यत्पश्यति नान्यच्छृणोति
नान्यद्विजानाति स भूमा ॥ इति भूमशब्दवाच्ये ब्रह्मणि दृष्टे । तन्निष्ठभेदप्रपंचदर्शनादिनिषेधः ३

१ ध्वमात्मानं तरत्वेन इति पा० २ इत्यादिना० ततः प्राणशब्देन निर्दिष्टात्पुरुषादन्यः परमेश्वर एव भू
मा इति पा० ॥ ३ ॥ म्नि ॥ इति ॥ आत्मैवेदं सर्वमात्मनः प्राण आत्मन आह ॥ इत्यादिना इति पा० ॥ ४ ॥
प्राणादिके इति पा० ॥ ५ ॥ सादृश्य- इति पा० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्रियते ः कथमिह संगत्यमितिचेत् ः न ः भूमिप्रत्यक्षे "नान्यत्पश्यति" इत्यादेरयमभिप्रायः।
निरतिशयसुखस्वभावे यस्मिन्साक्षात्कृते सुखांतराभिलाषेण रूपादिविषयदर्शनादौ न प्र
वर्त्तते यन्मग्नः पुरुषः सम्मग्नमात्रह्येति ः ब्रह्मानंदलवपरमाणवो हि विषयसुखविशेषाः ः तथा
हि श्रुतिः "एतस्यैवानंदस्यान्यानि भूतानि मात्रामनुभवंति॥ इति ः तस्मादिह ब्रह्मणि नद्वै
तंनिषेधप्रसक्तिः ः प्रपंचे सत्ये कथं मुक्तात्मनामपुरुषार्थस्य तस्य दर्शनं परिहियत इति न वि
चार्यं ः न हि मुक्तात्मनां प्राकृतप्रपंचो दर्शनविषयः। किंतु निरतिशयानंदस्वरूपं ब्रह्मैव प्रपं
चाकारेण दर्शनगोचरो भवति ः तथा हि श्रुतिः ः "एतत्तनुतो भवति" "आकाशशरीरं ब्र
ह्म" "सत्यात्मप्राणारामं मनआनंदं" इति ः तत्र "आप्नोति स्वाराज्यमाप्नोति मनसस्पतिं"
इत्यादिना मुक्तात्मा प्रस्तुतः ः "तस्य वाक्तंतिः" इत्यादिना स्वाधीनाप्राकृतविशुद्धवागिंद्रियादि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संबंध उक्तः ॥ तस्य पुनस्तादृशावस्थाप्राप्त्यनंतरमेतदृह्यमानं प्राकृतप्रपंचजालमाकाशश
रीरं चिदंबरप्रकाशशरीरं ब्रह्मैव भवतीति तात्पर्यं दहरस्यार्थः ॥ ततो मुक्तानां ब्रह्मणा सादृश्यं तत्स
मरसीभूतप्रपंचदर्शित्वमिति सर्वं समीचीनं ॥८॥ ॥ अक्षरमंबरांतधृतेः ॥९॥ ॥ बृहदार
ण्यके श्रूयते ॥ स्वविषयः ॥ एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंति । अस्थूलमनण्वह्रस्वम
दीर्घमलोहितमस्नेहमच्छायं ॥ इत्यादि ॥ अत्राक्षरशब्दवाच्यस्त्रेधा संदिह्यते प्रणवो जीवः प
रमेश्वरो वा इति ॥ प्रणवजीवयोरन्यतर एवाक्षरशब्दवाच्यः ॥ कुतः ॥ अक्षरशब्दस्य वर्णप
र्यायत्वात्प्रणववाचकत्वमुचितं ॥ "पुरुषोऽक्षरमुच्यते" इति पुरुषस्यापि तदभिधेयत्वमुक्तं ॥ ९
अतस्तावेवाक्षरशब्दवाच्याविति प्राप्ते ब्रूमः ॥ अत्राक्षरशब्दवाच्यं परं ब्रह्मैव ॥ कुतः ॥ अंबरांत
धृतेः ॥ यदूर्ध्वं गार्गि दिवो यदर्वाक् पृथिव्याः यदंतरा द्यावापृथिवी इमे यद्भूतं च भवच्च भविष्यच्च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

॥ इत्याचक्षते॥ ॥ आकाशएवतदोतंप्रोतंच॥ इतिसर्वविकाराधारतयानिर्दिष्टस्याकाशःक
स्मिन्नोतश्चप्रोतश्चेतिगार्ग्याप्रष्टे॥ ॥ एतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंति॥ इत्यादिना॥ ॥ एत
स्मिन्नुखल्वक्षरेगार्ग्याकाशओतश्चप्रोतश्च॥ इत्येतेनयाज्ञवल्क्यवचनेननिर्दिष्टस्याक्षरस्यांबरांतप्रपंच
स्यधृतिरवगम्यते॥ कथमेतदन्यत्रपरमेश्वरात् संभवति॥ ततःपरमेश्वरएवाक्षरपदाभिधेयः॥ ९॥

॥ ॥ साचप्रशासनात्॥ १०॥ ॥ साचधृतिरेतस्यैवाक्षरस्यप्रशासने॥ गार्गिसूर्याचंद्रमसौ
विधृतौतिष्ठतः॥ इत्यादिनात्रप्रकृष्टाज्ञावगम्यते॥ तज्जगच्छासनंचजीवस्यनसंभवति॥ एकोरु
द्रोनद्वितीयायतःस्थुः॥ इतिजगच्छासनेपरमेश्वरस्याद्वितीयाभावश्रवणात्॥ अतःपरमेश्वरए
वाक्षरं२॥ १०॥ ॥ अन्यभावव्यावृत्तेश्च॥ ११॥ ॥ अन्यभावोऽर्थांतरत्वं॥ ॥ तद्वाएतदक्षरंगा-
र्ग्यदृष्टंद्रष्टृश्रुतंश्रोतृअमतंमंतृअविज्ञातंविज्ञातृ॥ इतिवाक्यशेषःपरमेश्वरादक्षरस्यान्यभा

१- वाच्यइतिपूर्वपक्षः॥ कुतः॥ इतिपाठ॥ २- क्षरनामधेयःइतिपा०॥

CC-0: Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय वं व्यावर्तयति । प्रणवजीवपक्षयोरदृष्टत्वाविशेषेण दृष्टत्वाद्यसंभवात् । अतः परमेश्वर एवा
शैवभाष्यं क्षरमिति निर्णयः ॥११॥ ॥प्रत्यक्षादिप्रमाणातीतस्यापि परमेश्वरस्य परमकरुणावशादु
५ पासकप्रत्यक्षत्वमुपपादयितुमेतदधिकरणमारभ्यते॥ ॥ईक्षतिकर्मव्यपदेशात्सः॥१२॥
अस्य विषयः प्रश्नोपनिषदि श्रूयते । यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभि
ध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं ह वै स पाप्मना विनिर्मुक्तः
स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परपुरिशयं पुरुषमीक्षत । इति । अत्रेक्ष
तिकर्मत्वेन श्रूयमाणः परमेश्वरोऽन्यो वेति संशयः । नासौ परमेश्वरः । हिरण्यगर्भ एव । स सा ५
मभिरुन्नीयते ब्रह्मलोकम् । इति तल्लोकप्राप्तिश्रवणात् । परशब्दस्य जीवोत्कृष्टे तस्मिन् संभवा
च्च । अथवा नारायणः । तस्य पुरुषशब्दवाच्यत्वात् । जीवाद्घनाद्धिरण्यगर्भात् परत्वोपपत्ते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्च॰तस्मिन्नेवप्रणवेनाभ्यासप्रसिद्धेश्च॰॰तद्विष्णोःपरमंपदंसदापश्यंतिसूरय॥इतितत्सदृश्ये
वविद्वदनुभवविषयत्वश्रवणात्॰॰ऋग्भिरेतंरिशंसामभिर्यत्तत्कवयोवेदयंत॥इत्यग्निमश्नो
केतस्मात्तभिज्ञानाच्च॰इतिप्राप्तेब्रूमः।अत्रेक्षतिविषयःसपरमेश्वरः॰उत्तरत्र=तमोंकारेणाय~
नेनान्वेतिविद्वान्यत्तच्छांतमजरममृतमभयंपरंच॥इतितदसाधारणशांतत्वादि१धर्मव्यप
देशात्॰नहिहिरण्यगर्भेतत्कार्येशांतत्वादिकमस्ति२॥ब्रह्मलोकं॥इतिपरब्रह्मणःशिवस्य
लोकःप्राप्यतयावगम्यते॰॰जीवघन॥इतिजीवसमष्टिरूपोयोहिरण्यगर्भस्तस्मात्॥परात्
परं॥इतिपरत्वेनध्येयंहिश्रूयते॰ततोहिरण्यगर्भपक्षोनयुक्तः॰नारायणइतिपदुक्तंतद्विवा
र्ये॰॰अमृतमभयंपरंच॥इतिनित्यमुक्तत्वमभयहेतुत्वविश्वाधिकत्वयापरत्वंचकथमस्मि
न्नुपपद्यते॰=विश्वरूपोह्यसौ॥कथंचैतदुपपद्यते॰यज्जीवघनाद्धिरण्यगर्भादपिपरादुत्कृष्टान्ना

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्री।कं०ठी रायणात्परमश्रुयतीतिवर्णितं॥ नारायणपरंब्रह्म॥ ॥ ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं
यशेवभार्गं ऊर्ध्वरेतंविरूपाक्षं॥ इतिहिश्रूयते॥ तस्मात्परिदहरपुंडरीकेवर्तमानतयापुरुषशब्दवाच्यं॥ तस्य
६ प्रकृतिलीनस्य॥ यःपरःसमहेश्वरः॥ इत्यादिश्रुत्याप्रणवाभिधेयंच॥ नारायणपरंब्रह्म॥ इति
श्रुत्यानारायणाद्विश्वरूपादधिकं॥ वाङ्मनसविषयोसरहिततयाकृतंसत्यं॥ त्रिलोचनतयाविरू
पाक्षं॥ परशक्त्याप्रणववर्णात्मस्यासरूपोमाशब्दवाच्यपार्श्वललाकारत्वेनकृष्णपिंगलं॥ परंसर्वाति
शायि॥ ब्रह्मपरात्परं॥ पुरिशयानमितिपुरुषं॥ ईक्षतइतीक्षतिकर्मत्वेनव्यपदिश्यतइतिपुरुषः॥ यद्
नं॥ नहिमे॥ परमंपदं॥ इति॥ तत्रप्रपंचाकारत्वंमंतरेणायन्निरतिशयानंदस्वभावंविष्णोःपरमंपदं ६
रूपंतदेवशिवाभिधंपरंब्रह्मेत्यविरोधः॥ विष्णुशिवयोरूपप्रदाननिमित्तयोरस्याभेदमंतरेणस्वरूप
भेदोनास्तीत्यर्थः॥१२॥ ॥तदिहहरिविरंच्यादिप्रपंचोत्तीर्णस्याप्युपासकानुग्रहायपुरिशयान

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तयापुरुषस्यपरशक्तिरूपोमाशवलितरूपस्यविरूपाक्षस्यपरब्रह्मणः साक्षात्कारःसकलसं
सारनिवृत्ति १ पूर्वकंतत्प्राप्तयेतदुपासकानांतद्वाचकप्रणवपरायणांभवतीतिनिरूपितंःत
स्यपुरिशयनस्योपासनंचप्रकटयितुमिदमधिकरणंप्रस्तूयते॥ ॥दहरउत्तरेभ्यः॥१३॥
॥ ॥छांदोग्येश्रूयतेऽस्यविषयः। अथयदिदमस्मिन्ब्रह्मपुरेदहरंपुंडरीकंवेश्मदह
रोऽस्मिन्नंतराकाशः॥ तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वावविजिज्ञासितव्यं। इत्यादि। दहरशब्द
नेहभूताकाशउच्यते उतजीवःपरमेश्वरोवेतिसंशयः। आकाशशब्दस्यविपातिरूढतयाभू
ताकाशोदहराकाशः। अथवाजीवोदहरइति। अल्पपरिमाणत्वात्। तस्याणुभूतेऽस्मिन्
संभवात्। नमापीपरमेश्वरोदहर इतिप्राप्तेब्रूमः। परमेश्वरएवदहराकाशः। उत्तरेभ्योऽपह
तपाप्मत्वादिभ्योधर्मेभ्यः। एषआत्मापहतपाप्माजरोविमृत्युर्विशोकोविजिघत्सोऽपिपासः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय शैवभाष्यं. सत्यकामः सत्यसंकल्प॥ इतिश्रुतिवाक्यसिद्धेभ्य इतिशेषः॥ नन्वेते कथं संसारिणि जीवे संभवं-
ति॥ तस्मादीश्वर एव दहराकाशोऽपहतपाप्मत्वादिगुणक इति॥१३॥ ॥गतिशब्दाभ्यां
७ तथाहि दृष्टं लिंगं च॥१४॥ ॥तद्यथा॥ हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरंतो
न विंदेयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छंत्य एतं ब्रह्मलोकं न विंदंति अनृतेन हि प्रत्यूढा॥
इति वाक्यशेषे प्रजानामहरहरस्मिन् दहराकाशे गतिः श्रूयते॥ पश्चाच्च ब्रह्मलोकशब्दः॥ ता
भ्यामपि दहराकाशः परमेश्वरः॥ तथाहि॥ श्रुत्यंतरे परमेश्वर एव सर्वप्राणिगमनं दृष्टं॥ एवमेव
खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति ब्रह्मलोकशब्दश्च तस्मि ७
न् दृष्टः॥ एष ब्रह्मलोकः सम्राडिति होवाच॥ इति॥ ॥किंच मा भूद्गतिशब्दयोरन्यत्र दर्श
नं॥ अस्मिन् प्रकरणे सर्वासां प्रजानामहरहः श्रूयमाणं गमनं ब्रह्मलोकशब्दश्च परमेश्वरस्य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दहराकाशत्वपर्यवसानं गमकं २ ॥१४॥ ॥धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥१५॥ ॥अ
थ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदाय इति जगद्विधृतिः परमेश्वरस्य महिमास्मि
न् दहराकाश उपलभ्यते धृतिश्च परमेश्वरमहिमा एष सर्वेश्वर एष भूताधिपतिरेष भू
तपाल एष सेतुर्विधारण एषां लोकानामसंभेदाय इति श्रुतेः अतोऽपि दहराकाशः परमे
श्वरः १॥१५॥ ॥प्रसिद्धेश्च ॥१६॥ ॥दहरं विपाप्मवरवेश्मभूतं यत्पुंडरीकं पुरमध्य
संस्थं। तत्रापि दहरं गगनं विशोकस्तस्मिन्यदंतस्तदुपासितव्यं इति महोपनिषदि दह
त्पुंडरीकं विरजं ॥ इत्यारभ्य उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकंठं प्रशांतं। ध्यात्वा इत्या

१ घा इति पा० ॥ २ इति। अत्र दहरखाकाशेषे॥ इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं
न विंदंति इति दहरविषयाभ्यां गतिब्रह्मलोकशब्दाभ्यां दहरो ब्रह्म च ब्रह्मणो लोक इति चतुर्मुखलो
को वाच्यः तथा हि सुमस्य दष्टमहरहर्ब्रह्मगमनं कर्मधारयग्रहे लिंगं एवकारार्थश्चकारः त
था च दहरो ब्रह्म इत्येव पा० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय
शैवभाष्यं
८

।दिहैवास्योपनिषत्स्वेव परमेश्वरस्योमासखस्य दहरपुंडरीकमध्यवर्तित्वेनोपास्यत्वं प्रसिद्धं ३ न
नोऽपि परमेश्वरो दहराकाशः २॥ ननु दहरपुंडरीकमध्ये दहराकाशांतर्वर्तित्वेनोपास्यत्वं ४
य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेते सर्वस्य वशी सर्वस्येशान॥ इत्याद्युपनिषदंतरे प्रसि
द्धं परमेश्वरस्य ४ इह दहराकाशत्वेनेति विरोध इति चेन्न: अत्रापि दहराकाशमध्यवर्ती न पर
मेश्वर उपास्यः ५ किंतु दहराकाशे परमेश्वरधर्मणामपहतपाप्मत्वादीनां संबंधप्रतीते ५ दे
हराकाशत्वमप्यस्य चिदंबररूपतयेति न विरोधः॥१६॥ ॥इतरपरामर्शात्स इति चेन्नासं
भवात्॥१७॥ ॥अथ पर एष संप्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रू ८

१ अतः परमेश्वरमहिमा दहराकाशोऽशेषसेतुर्विधारक इति श्रूयत इति पा०॥२ स्यतत्प्रसिद्धं दहरगम्य
त इति पा०॥३ दहरशब्दवाच्यः इति पा०॥४ ननु पुंडरीकमध्ये दहराकाशांतर्वर्तित्वेन परमेश्वरस्योपास्यत्व
मुपनिषदंतरे प्रसिद्धं इति पा०॥५ तेनाच्छब्दवाच्यत्वमस्येति उक्तं इति पा०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पेणाभिनिष्पद्यतएषआत्मेतिहोवाच॥ इतिइतरोजीवःपरामृश्यते॥ अतःप्रकृताकाशःस
एवभवतीतिचेन्न॰ उक्तानामपहतपाप्मत्वादीनांतस्मिन्नसंभवात्॥ अतःपरमेश्वरएवतदा
श्रयइतियुक्तं॥१७॥ ॥उत्तराच्चेदाविर्भूतस्वरूपस्तु॥१८॥ ॥उत्तरत्रप्रजापतिवा
क्ये॥ यआत्माअपहतपाप्माविजरोविमृत्युर्विशोकोविजिघत्सोऽपिपासःसत्यकामःसत्य
संकल्पःसोऽन्वेष्टव्यःसविजिज्ञासितव्यःससर्वांश्चलोकानाप्नोतिसर्वांश्चकामान् यस्तमा
त्मानमनुविद्यविजानाति॥ इतिजीवस्यापहतपाप्मत्वादिकंश्रूयते॥ जीवत्वलक्षणमवस्था
त्रयवर्तित्वंचश्रूयते१॥ यएषोऽक्षिणिपुरुषोदृश्यतेएषआत्मेतिहोवाच॥ यएषस्वप्नेम॰
हीयमानश्चरत्येषआत्मेतिहोवाच॥ तद्यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानात्येष
एषआत्मेतिहोवाच॥ इतिः ततःसएवायंभवितुमर्हतीतिचेत्॥ नसारमेनतत्॥ निज्ञानादिकलं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ककर्मसंबंधघटितकलेवरतिरोहितापहतपाप्मत्वादिकोजीवः परंज्योतिरूपसंपद्यपश्चादा
विर्भूतस्वरूपः आविर्भूतापहतपाप्मत्वादिकोऽप्रतिपाद्यते न संसारी दहराकाशस्तुस्वा
भाविकातिरोहितनन्तकल्याणगुणइतिनबद्धोमुक्तोवात्रदहराकाशः ॥१८॥ ॥अन्या
र्थश्चपरामर्शः ॥१९॥ ॥अस्माच्छरीरात् समुत्थायपरंज्योतिरूपसंपद्यस्वेनरूपेणाभि
निष्पद्यत ॥ इतिजीवस्यदहराकाशशब्दनिर्दिष्टेनपरवस्तुनासंपद्यस्वरूपाविर्भावोऽभिधी
यते ॥ तत्रतादृक्तन्माहात्म्यप्रतिपादनार्थोजीवपरामर्शः ॥ अतोनविरोधः ॥१९॥ ॥
अल्पश्रुतेरितिचेत्तदुक्तं ॥२०॥ ॥अल्पस्थानाश्रयत्वादल्पस्वरूपप्रतीतेर्नपरोऽयमि ९
तिशंकायाः पूर्वमुक्तमेवोत्तरंव्योमवच्चेति ॥२०॥ ॥अनुकृतेस्तस्यच ॥२१॥ ॥
तस्यजीवस्यदहराकाशशब्दनिर्दिष्टपरंज्योतिरनुकृतिरवगम्यते ॥ नैनंसेतुमहोरात्रेतरतो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नजरानमृत्युर्नशोकोनसुकृतंनदुष्कृतंसर्वेपाप्मनोऽतोनिवर्तंतेऽपहतपाप्माह्येषब्रह्म
लोकः॥ तस्माद्वाएतंसेतुंतीर्त्वाअंधःसन्ननंधोभवतिविद्धःसन्नविद्धोभवतिउपतापीसन्न
नुपतापीभवति। तस्माद्वाएतंसेतुंतीर्त्वापिनक्तमहरेवाभिनिष्पद्यतेसकृद्विभातोह्येवैषब्र
ह्मलोकः॥ इतिवाक्यशेषः॥ अत्रहिदहराकाशधर्माअपाप्मकार्यंतपाजराद्रवत्पाप्मस्पृष्टसा
धुतादेरभावेसततोदितप्रकाशत्वंचप्राप्यस्यदहराकाशस्यापहतपाप्मत्वंसततोदितप्रकाश
त्वंचहेतुत्वेनोच्यते तेनदहराकाशंप्राप्तस्यात्मफलावाप्तिस्तस्याप्यापनिरस्तानदनुक्तानिरीति
लभ्यते॥ साचततोऽभेदएवोपपद्यते। अतश्चायं नजीवइतितात्पर्यं॥२१॥ ॥पुनरस्मिन्
प्रकरणांतरमाह॥ ॥अपिचस्मर्यते॥२२॥ ॥दहरपुंडरीकांतर्वर्तिनमुपास्यत्वेनब्रह्म
णःस्मर्यते॥ अथवापरमात्मानंपरमानंदविग्रहं।गुरूपदेशाद्विज्ञेयंपुरुषंकृष्णपिंगलं॥ ब्रह्म

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रह्मपुरे गार्गि दहराब्जस्य मध्यमे अभ्यासात्संप्रपश्यंति संततस्त्वं च तथा कुरु ॥ ॥ इत्या
दि १ ततः परंज्योतिः स्वरूपं मुक्तप्राप्यं परः शिवः तदुपासनार्थं परब्रह्म दहरपुंडरीकाकाशमध्यव
र्तित्वाभाविकापहतपाप्मत्वादिगुणकमुपासनीयमिति सिद्धं ॥ २२ ॥ ॥ अथ परमेश्वर
स्योपास्यरूपांतरमुच्यते ॥ ॥ शब्दादेव प्रमितः ॥ २३ ॥ ॥ कठवल्लामस्य विषयः श्रू
यते ॥ अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सते ॥
॥ इत्यादिः इहांगुष्ठमात्रतया २ श्रूयमाणः पुरुषः परमेश्वरो जीवो वेति संदेहः । जीव इति व
क्तुं ३ युक्तं । स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा । प्राणाधिपः संचरति स्वकर्मभिः ॥ अंगुष्ठमात्रो र १०
वितुल्यरूपः । संकल्पाहंकारसमन्वितो यः इति तस्यांगुष्ठमात्रत्वसिद्धेः मध्य आत्मनि तिष्ठ
ति ॥ इति देहांतर्वर्तित्वावगमाच्च ॥ ननु परमेश्वरो व्यापक इति प्रागेव वदामः ॥ परमेश्वर एवांगु

१ स्वगम्यते ॥ अनन्य आयं इत्येव पा० ॥ २ प्रमाणान्तया इति पा० ॥ ३ संदेहे जीव इति विवेक्तुं इति पा० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ष्ठमात्रश्रुतिर्नयुक्तं॥ "ईशानो भूतभव्यस्य" इत्यादिपरमेश्वरलिंगशब्दात्॥ "सर्वैश्वर्यसं
पन्नः सर्वेश्वरश्शंभुराकाशमध्यगा इति तस्यैव सर्वेश्वरत्वश्रवणात्॥२३॥ ॥
कथं परमेश्वरेऽपरिच्छिन्नत्वमभ्यस्यमानमुपपद्यत इत्यत आह॥ ॥हृद्यपेक्षया
तु मनुष्याधिकारत्वात्॥२४॥ ॥अपरिच्छिन्नस्यापि परमेश्वरस्यांगुष्ठमात्रत्वमुपास
कहृदयापेक्षया मनुष्याधिकारत्वादुपासनाशास्त्रविधेः मनुष्याणां हृदयं यावत्प्रमा
णं तदवच्छिन्नं रूपं परमेश्वरः परमकारुणिकः परिगृह्णातीति तदुपासनासिद्ध्यै ततः पर
मेश्वरो ज्योतिर्मयो लिंगरूपतयोपासकानां हृदयमध्ये तिष्ठतीति निर्णयः॥२५॥ ॥मनु
ष्याधिकारत्वात्॥ इत्यस्मिन्नधिकरणे मनुष्याणामेव परमेश्वरोपासनेऽधिकारः सूचितः॥
कथं देवानामपि परमेश्वरविषयमुपासनं श्रूयते "यो वै शिरसि" ते देवा रुद्रमपश्यंस्ते दे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय वा रुद्रं ध्यायंति॥ इत्याशंक्यापं तदुपपादनायाधिकरणमिदमारभ्यते॥ ॥तदुपर्यपि बा
शैवभाष्यं दरायणः संभवात्॥२५॥ ॥अस्याथर्वशिरसि श्रूयते॥ ते देवा रुद्रं ध्यायंति॥ इति विषयः॥
११ इह परमेश्वरोपासने देवानामधिकारः संभवति न वेति संशयः। न संभवतीति पूर्वःपक्षः॥
अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तो हि वैदिके कर्मण्यधिकारी॥ न च तेषां सामर्थ्यमस्ति
तेषां विग्रहाभावात्॥ विग्रहवंतो हि स्तुतिध्यानादिषु कस्यचित् समर्थाः॥ इंद्रो वृत्राय वज्रमु
द्यच्छत्॥ इत्यादीनां प्रामाण्यात् तेषां विग्रहवत्त्वमिति चेत्॥ न॥ विध्येकवाक्यतानापन्नानाम
न्यत्र तात्पर्याभावात्॥ सद्भावेऽपि तेषामर्थित्वं नास्ति परमेश्वरपदं प्रति॥ तेषां परमेश्वरस्य च प ११
रस्पैकत्वात्॥ देवा ह वै स्वर्गं लोकमगमंस्ते देवा रुद्रमपृच्छन्॥ को भवान्॥ इति श्रुत्या स्वर्गे ए
व लोको रुद्रस्य परब्रह्मणः पदमवगम्यते॥ स एव देवानां मुक्तस्यापि स्वाराज्यमेवगम्यतयावग
म्यते॥ वालाग्रशतभागस्य शतधा कल्पितस्य च॥ इत्यादिषु स्वल्पाकारत्वेनागमात्॥ न ह्यसौ मध्य आत्मनि
तिष्ठति॥ इति देहांतर्वर्तितया वचनादिति चेत्॥ अत्र उच्यते॥ परमेश्वरेऽशरीरिच्छिन्नत्वमस्यास्य मानमिह कथं युक्त
मित्यत इति चेत्॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

म्पते ॥ आप्नोति स्वाराज्यं ॥ इत्यादिषु तथा वेदमप्यपि तेषां नास्ति उपनयनसंस्कारपूर्वक
स्य वेदाध्ययनस्याभावेन तेषां वेदांतविचारासंभवाद्ब्रह्मबोधानुपपत्तेः ॥ अत एव तेषां शास्त्र
पर्युदासश्च ॥ तस्माद्देवतानां नास्ति ब्रह्मोपासनेऽधिकार इति । सिद्धांतस्तु ब्रह्मोपासने देवाना
मप्यधिकारोऽस्ति ॥ कुतस्तेषामर्थित्वाद्यधिकारलक्षणसंभवात् । न च परमेश्वरस्य देवा
नां च यद्दस्समानं । सामान्येन सुखवाचकोऽपि स्वर्गशब्दः प्रकरणादिना विशेषमभिधत्ते । प
येश्वरशब्दः स्वामिमात्रवाचकः । प्रकरणवशात् ॥ उपपादोश्वरं चैव योगक्षेमार्थसिद्धये ॥
इत्यादिषु जनपदाधिपतिमात्रवाची राजविषयः ॥ ब्रह्मणः प्रकरणे पुनरयं निरतिशयैश्वर्य
वाचीतादृशपाभवति ॥ तथा सुखमात्रवाचकः स्वर्गशब्दः प्रकरणे न प्रमाणांतरेणापत्याद्देवा
नां पदं सर्पिषस्तु न सातिशयत्वादिदोषकलुषितं चाल सुखं मभिधत्ते परब्रह्मणः शिवस्य पदे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय शैवभाष्यं १२ तु निरतिशयसुखस्वरूपमनावृत्तिलक्षणमेव श्रूयते। अतः सातिशयत्वादिदुःखसुखरूपस्वर्गादि
नां निरतिशयसुखं ब्रह्मरूपं मत्प्रार्थित्वं संभवत्येव ३ तेषामर्थवादप्रामाण्यादिग्रहवत्त्वेन सामर्थ्यं
चास्ति। तथा॥ आदित्यो यूपः॥ अग्निर्हिमस्य भेषजं॥ इत्यादिना गुणवादानुवादानां स्वार्थे
तात्पर्याभावेऽपि। इंद्रो वृत्राय वज्रमुदयच्छत्॥ इत्यादीनां भूतार्थवादानां प्रामाण्येन स्वार्थे तात्प
र्यदर्शनात् ३ शतक्रतुश्च पतिः स्वयंभानवेदार्थत्वात् २ पूर्वाधीतवेदाविस्मरणाभावाद्वा तेषामवैदुष्यं च
संभवति। शास्त्रस्य सामर्थ्येनोपासनाविधायकत्वादधिकारस्य दुर्निवारत्वेन दूरतः स्वस्यर्पदासः॥
तस्माद्ब्रह्मविद्यायामधिकारिणो देवाः॥ २५॥ ॥देवानां विग्रहादिमत्त्वे विरोधमाशंक्य परिहरति॥ १२
॥ ॥विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात्॥ २६॥ ॥नानादेशेषु प्रवृत्तेषु यज्ञेषु त
त्राहूतानां देवानां विग्रहादिमत्त्वे सर्वत्र युगपत्सान्निध्यं वाच्यं। तन्नोपपद्यते। ततः कर्मणि विरोध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इतिचेन्नशंकामेतत्॰ विग्रहवत्वेपिसोभरिप्रभृतिषुयुगपदनेकदेहप्रतिपत्तिर्दृष्टाहि॰ ततोनक
श्चिद्दोषः॥२६॥ ॥माभूत्कर्मणिविरोधः॰ वैदिकेशब्देभवतीत्यतआह॥ ॥शब्द
इतिचेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्यां॥२७॥ ॥कर्मविरोधाभावेऽपिवैदिकेशब्देविरो
धःप्रसज्यतेः कुतः॰ देहानांसावयवत्वादनित्यत्वंसहजमेव॰ ततइंद्रादिदेहानामप्युत्पत्तिरनि
वार्या। तथात्वेतदुत्पत्तेःप्राक्तद्विनाशात्॰ परतश्चवैदिकेंद्रादिशब्दानामर्थशून्यत्वमनित्यत्वं
वास्यात्॰ अनित्यत्वेपौरुषेयत्वेनविधिनिषेधवाक्यानामप्रामाण्यः अतस्तत्प्रयुक्तकर्मणांचासि
द्धिरित्यनेकानर्थापत्तिः॰ ततोवैदिकशब्दविरोधस्यपरिहारायविग्रहवत्वंदेवानामनंगीकार्यमि
तिचेत्॰ न॰ यतोवैदिकादेवेंद्रादिशब्दादर्थसृष्टिः॰ यदींद्रादिशब्दाव्यक्तिवाचकाःस्युःतदाव्य
क्तींद्रादिशब्दार्थनाशेतेषामर्थशून्यत्वमनित्यत्वंवास्यात्॰ गवादिशब्दवदाकृतिवाचकत्वमेवं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय द्यादिशब्दानामुच्यतेः तथाच यथा कुलालो घटादिशब्दान्मनसि विपरिवर्तमानेन तदाकारं
१२ स्मृत्वा घटादिकं सृजतिः तथा पूर्वस्मिन्निंद्रादौ विनष्टे वैदिकादिंद्रादिशब्दादेव ब्रह्मा पूर्वेंद्रा
द्याकृतिविशेषं स्मृत्वा तदाकारमपरमिंद्रादिकं सृजतिः तत इंद्रादिव्यक्तिविनाशेऽपि तत्तदा
कृतेरवशेषणात्तच्छब्दानां १ नित्यत्वाद्दविरोधः। किं प्रमाणमिति चेत्ः श्रुतिः स्मृतिश्चः त
था हि "वेदेन रूपे व्याकरोत्सत्सती प्रजापतिः" "स भूरिति व्याहरत्" "स भूमिमसृज
त्" इत्यादि श्रुतिः सर्वेषां च स नामानि कर्माणि च पृथक् पृथक्। वेदशब्देभ्य एवादौ पृथक्
संस्थाश्च निर्ममे॥ इत्यादि स्मृतिः॥२७॥ ॥अत एव च नित्यत्वं॥२८॥ ॥अत एव "मं १२
त्रकृतो वृणीते" विश्वामित्रस्य सूक्तं भवतीति विश्वामित्रादीनां मंत्रकृत्वेऽपि विश्वामित्रादिश
ब्दानामाकृतिनिमित्तत्वेन मंत्रब्राह्मणमयस्य वेदस्य नित्यत्वमुपपद्यतेः यतो ब्रह्मा वैदिकान्स्मृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्वार्यन्तस्मृत्वासृजति ॰ अनधीतमंत्रादिदर्शनशक्तत्वादियुतानृः तथा च पूर्वं विश्वामित्रादी
नामाकृतिविशेषांस्तत्तद्वैदिकशब्दैः स्मृत्वा ३ तदाकारानेवापरांस्तच्छक्तिविशेषयुक्तानृ
ष्ठीन्नैमित्तिकप्रलयेगतेसृजति ॰ तेचानधीत्यैवतान्मंत्रानखिलान्पठंति ॰ अतस्तेषांमंत्रादिक
र्तृत्वंवेदनित्यत्वंच ॥ २८ ॥ ॥ भवत्वेवंनैमित्तिकप्रलये प्राकृतप्रलयेतुब्रह्मादौवेदाश्चशब्दा
श्चविनष्टेकथंवेदनित्यत्वमित्यतआह ॥ ॥ समाननामरूपत्वाच्चावृत्तावप्यविरोधोदर्शना
त्स्मृतेश्च ॥ २९ ॥ ॥ सृज्यमानांसमाननामरूपत्वादेवप्राकृतप्रलयावृत्तावप्यविरोधः तथाहि
सर्वज्ञः सर्वशक्तिर्विश्वाधिपः परमेश्वरस्त्वादिकल्पेपूर्वप्रपंचसंस्थानंस्मृत्वातदाकारमेवपुनः
प्रपंचंसृजति ॰ वेदानपिपूर्वानुपूर्वीविशिष्टान्संस्मृत्यतत्रभूतायब्रह्मणेप्रयच्छति ॰ कथमव
गम्यते ॰ श्रुतिस्मृतिभ्यांच ॰ ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् दिवंचपृथिवींचांतरिक्षमथोस्वः ॰ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय
शैवभाष्यं
१४

योब्रह्माणंविदधातिपूर्वंयोवैवेदांश्चप्रहिणोतितस्मै ॥ इत्यादिश्रुतिः ॥ स्मृतिरपि ॥ अप
एवससर्जादौतासुबीजमवासृजत् । तदण्डमभवद्धैमंसहस्रांशुसमप्रभं ॥ तस्मिन्जज्ञेस्व
यंब्रह्मासर्वलोकपितामहः ॥ ब्रह्माणंविदधेपूर्वंवेदानस्मैप्रयच्छति ॥ ॥ इत्यादि ॥ ततः
प्राकृतमलप्रलयेष्वपिवेदानांनित्यत्वमेव ॥ २९ ॥ ॥ मतांतरमाह ॥ ॥ मध्वादिष्वसं
भवादनधिकारंजैमिनिः ॥ ३० ॥ ॥ मधुविद्यादिषुवस्वादिदेवानामेवोपास्यत्वात् प्राप्य
त्वाच्चवस्वादीनांकर्तृकर्मभावविरोधेनोपास्यत्वासंभवाद्वस्वादीनांसतांवस्वादित्वंप्राप्तमि
तिप्राप्यत्वासंभवाच्चतत्रवस्वादीनामधिकारंजैमिनिर्मन्यते ॥ ३० ॥ ॥ ज्योतिषिभावाच्च १४
॥ ३१ ॥ ॥ तंदेवाज्योतिषांज्योतिरायुर्होपासतेऽमृतं ॥ इतिज्योतिषिपरब्रह्मणिदेवानां
साधारण्येनप्राप्तत्वेऽप्यधिकारभाववचनादन्यत्रमध्वाद्युपासनेऽनधिकारोन्यायसिद्धोग

१ मित्रादीनिंद्रादिकमपिवैदिकशब्दात्सत्ता इतिया ॥

म्यते ॥ ३१ ॥ ॥ स्वमतमाह ॥ ॥ भावं तु बादरायणोऽस्ति हि ॥ ३२ ॥ ॥ मधुविद्यादिष्वपि व
स्वादीनामधिकारभावं बादरायणो मन्यते ॥ अस्ति वस्वादीनां सतां वस्वावस्थब्रह्मण उपास
त्वसंभवः ॥ कल्पांतरे वसुत्वादेः प्राप्यत्वसंभवश्च ॥ कार्यकारणोभयावस्थं ब्रह्मात्र समुपास्यं
" तत्रासौ वा आदित्यो देवमधु ॥ इत्यारभ्यादित्यवस्वादिनामरूपकृत्ययुक्तकार्यविशेषावस्थं
ब्रह्मोपास्यमुपदिश्यते ॥ अथ तत ऊर्ध्व उदेत्य नैवोदेतानामरूपकृत्यरहितसूक्ष्मादित्यांतरा
त्मतयावस्थितं कारणावस्थं ब्रह्मोपास्यमुपदिश्यते ॥ तदुभयावस्थब्रह्मोपासनफलं कल्पांतरे
वस्वादित्वमुभयाधिकारावसाने ब्रह्मप्राप्तिश्च ॥ तत्र " स य एतदेवममृतं वेद वसूनामेवैको भू
त्वाग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यति ॥ इत्यादिना वस्वादिस्वरूपफलमुपदिश्यते ॥ "
न ह वा अस्मा उदेति न निम्लोचति सकृद्दिवा हैवास्मै भवति य एतामेवं ब्रह्मोपनिषदं वेद ॥ इति

१ इ वस्वाद्युपासने ऽ इति पा० ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रह्मप्राप्तिरूपं फलमुपदिश्यते॥ ततो मध्वादिष्वपि देवानामधिकारोऽस्तीति॥ १ तस्मात्सर्वथा
देवा ब्रह्मविद्याधिकारिण इति॥ ॥ ३२॥ ॥ अथ मनुष्याधिकारत्वादिति सामान्येन मनु
ष्याणामधिकारप्राप्ते विशेषमाह॥ ॥ शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि॥
३३ छान्दोग्ये श्रूयते ऽस्या विषयः। आजहारेमाः शूद्रानेनैव मुखेनालापयिष्यथा इति।
अत्राचार्यः शिष्यं शूद्रेत्यामन्त्रयते। अतः शूद्राणामपि ब्रह्मविद्यायामधिकारोऽस्ति नवेति सं
देहः। तेषामधिकारोऽस्ति। अर्थित्वादिसंभवात्। न च त्रैवर्णिकानामेवेति नियमः। अत्रैवर्णि
कानामपि देवानां तद्दर्शनात्। देवानामुपनयनाध्ययनाभावेऽपि स्वयंभातवेदार्थतयाप्युज्यते वि १२
दूनाः कथमेषामिति न शंक्यं। एषामपि पुराणश्रवणादिना बोधोपपत्तेः। निषादस्थपतिन्याये
न महापातकग्रहणोऽधिकारसंभवाच्च। तस्मादमीषामधिकारो ब्रह्मविद्यायामुचित इति प्राप्ते ब्रूमः।

१-अप्यधिकारसिद्धिः। इति पा०॥

नास्तिशूद्राणांब्रह्मविद्यायामधिकारः । तेषामध्ययनाभावेनतदुपायभूतोपासनमुख्याणांदिक्षा
नासंभवात् । इतिहासपुराणानिवेदोपबृंहणंकुर्वन्त्येवोपायभावमनुभवंतिनस्वातंत्र्येण । शू
द्राणामितिहासपुराणाश्रवणाज्ज्ञानंतुपापक्षयफलं । विदुरधर्मव्याधादीनांजन्मांतरसिद्ध
ज्ञानाश्रमोपार्जितब्रह्मनिष्ठता । कथंब्रह्मविद्योपदेशःशूद्रत्वमंत्रणामितिचेत् । नात्रजातियोगेन
शूद्रत्वामंत्रणं । किंतुब्रह्मज्ञानमप्राप्याशुगस्यसंजातेतिदर्शनात् । शुगस्यसंजातेतिवचनाद्द्रा
द्राश्रवणात् । ब्रह्मविद्यावैकल्येनस्वात्मानंप्रतिहंसोक्तानादरवाक्यश्रवणात् । तदेवाचार्य
मन्याद्रवणाच्च । ॥ सूच्यतेहि । शब्दोहेतोः । अतःशूद्रत्वामंत्रणांनजातियोगेन । ततःशूद्रस्य
ब्रह्मोपासनंनास्तीति ॥ ३३ ॥ ॥ इतश्चशूद्रत्वामंत्रणांनजातियोगेनेत्याह ॥ ॥ क्षत्रियत्वा
वगतेश्च ॥ ३४ ॥ ॥ शुश्रूषोर्जानश्रुतेःक्षत्रियत्वावगतेश्चनजातियोगेनशूद्रत्वामंत्रणां । उप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ख्यानोपक्रमो हि॥ जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस॥ स सर्वत आव
सथान्मापयांचक्रे। सर्वत एव मेऽत्स्यंति॥ इति जानश्रुतेर्धनिपातित्वं बहुनरएककाल्नप्रदायित्वं
चोक्तं॥ मध्ये च॥ सहस्रजिहान एव क्षत्तारमुवाच॥ इति तस्यैश्वर्यमुक्तं॥ अंते च॥ इयं जाया ऽयं
ग्रामो यस्मिन्नास्स इति तेहैते रैक्व॥ पर्णा नाम महावृषेषु यत्रास्मा उवास॥ इति बहुग्रामप्रदायि
त्वमुक्तं॥ एतैर्लिंगैर्जानश्रुतेः क्षत्रियत्वमवगम्यते॥३५॥ ॥उत्तरत्र चैत्ररथेन लिंगात्॥३६॥
॥ ॥उपरिष्टाद्धासां संवर्गविद्यायां ब्रह्मक्षत्रिययोरेवान्वयो दृश्यते॥ अथ शौनकं च कापेय
मभिप्रतारिणं च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी बिभिक्षे॥ इत्यादौ॥ अभिप्रतारी चैत्रर १६
थः क्षत्रिय इत्यवगम्यते॥ कापेययोगात्॥ कापेययाजकयोगो हि चैत्ररथस्य श्रुतः॥ एतेन वै चैत्रर
थं कापेया अयाजयन्॥ तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वन्॥ इति॥ तेनाभिप्रतारिणः संताने

१ रैक्व इति पा०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रात् चित्ररथत्वसिद्धावपि न तद्वंश्यत्वं सिध्यति॥ समानान्वयानां हि समानान्वयाः प्रायेण याजका
भवन्ति॥ चित्ररथवंश्यत्वे सति क्षत्रियत्वे॥ तस्माच्चैत्ररथ्यानामेकः क्षत्रपतिर्जायत॥ इति तद्व्या
ख्यशेषेण सिध्यति॥ एवं चोत्तरत्र ब्राह्मणे नकापेयेन युक्तोऽभिप्रतारी क्षत्रिय इति निश्चिते त
द्दूरब्राह्मणेन रैक्केन युक्तो जानश्रुतिरपि क्षत्रिय इति गम्यते॥ अतः क्षत्रिय एव क्षत्तेत्यामंत्रितः
॥३५॥ ॥ यदुक्तं निषादस्थपतिन्यायेन शूद्रस्य महावाक्यश्रवणमात्रेऽधिकार इति तत्राह॥
॥ संस्कारपरामर्शात्तदभावाभिलापाच्च॥३६॥ ॥ ब्रह्मविद्योपक्रमे॥ उपत्वा नेष्ये तं होपनि
न्ये॥ इत्यादिप्रदेशेषूपनयनसंस्कारपरामर्शात्॥ शूद्रस्य च॥ न शूद्रे पातकं किंचिन्न च संस्का
रमर्हति॥ शूद्रश्चतुर्थो वर्ण एकजातिः॥ इत्यादिस्मृतिषु तदभावश्रवणात्॥ तस्य ब्रह्मविद्याया
मनधिकारः॥ निषादस्थपतिं याजयेत्॥ इति विधिरस्तीति न विरोधः॥ उपनयनाभावेऽपि शूद्र
शांकरमते न क्षत्रियत्वावगतेश्चोत्तरत्र चैत्ररथेन लिंगात् इत्येकं सूत्रं॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यमहागाकाश्रवणेकृत्यापिनविधिः ॥२६॥ ॥तद्भावनिर्धारणे च प्रवृत्तेः ॥२७॥ ॥
नैतद्ब्राह्मणो वक्तुमर्हति ॥ समिधं सोम्याहर उप त्वा नेष्ये न सत्यादगाः ॥ इति सत्यवचनेन जा
बालस्य शूद्रत्वाभावनिर्धारणे सत्येव तदुपनयनानुशासनविधोपदेशप्रवृत्तेश्च न शूद्रस्याधि
कारः ॥२७॥ ॥ ननूपनयनाभावे ब्रह्मोच्चारणनिषेधः क्वाचित्कः सार्वत्रिको वा ३ न सा
र्वत्रिकः ४ शिशोरुपनयनाभावेऽपि ५ न ब्रह्माभिव्याहारयेदन्यत्र स्वधानिनयनात् ॥ इति
स्वधानिनयने ब्रह्मोच्चारणविधानात् ॥ तेन क्वाचित्कः ५ इति प्रज्ञ्यते ॥ अतः शूद्रस्यानुपनीत
स्य पाकयज्ञादिषु ब्रह्मोच्चारणः निषेधो न ब्रह्मविद्यायामित्याशंकायामाह ॥ ॥ श्रव
णाध्ययनार्थप्रतिषेधात् ॥२८॥ ॥ शूद्रस्य वेदश्रवणादि निषिध्यते ॥ तस्माच्छू १७

२ मर्शाच्छूद्रस्य तदभावश्रवणात् इति पा० ॥ ३ रस्तिर्यथा न हूद्रत्र विधिः ॥ न लेन निरोध्यः इति वरपा० ॥
३ ह्यत्र सर्वत्र वा इति पा० ॥ ४ न सर्वत्र इति पा० ॥ – रणाभ्यामिसंभवात्तेनैकत्र इति पा० ॥ शंकरमते श्र
वणाध्ययनार्थप्रतिषेधात् स्मृतेश्च इत्येकमेव सूत्रं ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

द्रसमीपेनाध्येतव्यमिति । अत एव नः कुतोऽध्ययनादिप्रसक्तिः ॥ ३८ ॥ ॥ स्मृतेश्च ॥ ३८ ॥
स्मर्यते च शूद्रस्य वेदश्रवणादौ दंडः । "अथास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रपरिपूर
णं उदाहरणे जिह्वाच्छेदो धारणे शरीरभेद" ॥ इति । एवं श्रुतिस्मृतिभ्यां शूद्रसमीपाध्यय
नादिनिषेधात् कुतस्तेषां वेदार्थविचारादिकं[१] । अतः सर्वेषामष्टवर्षब्राह्मणाद्युपदिष्टकोपनय
नसंस्कारमंतरेण वेदाध्ययनप्राप्तिर्न कुत्रापि कस्यचिदिति सिद्धं । ततः शूद्रस्य ब्रह्मविद्यायाम
नधिकारिण एव ॥ ३९ ॥ ॥ एवं प्रासंगिकमधिकारनिरूपणं कृत्वा प्रकृतमनुसरति ॥ ॥
कंपनात् ॥ ४० ॥ ॥ अंगुष्ठमात्रप्रमितपुरुषकरणे कर्तृत्वं प्राणश्रूयते । "यदिदं किंच जगत्
सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं" । "य एतद्विदुरमृतास्ते भवंति" इति । तत्र कंप
नहेतुः परमेश्वरोऽन्यो वेति संशयः । अत्र प्राणशब्दनिर्दिष्टजनितभयेन सकलजगत्कंपनमु

१ शूद्रस्य समीपेऽध्ययनादिकमपि निषिध्यते वेदस्य । कुतस्तदर्थविचारणादिकं इत्यर्थः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीकंठीय शैवभाष्यं १८

श्रुतेः परमेश्वरस्य सकलजगदुपादानमधुरत्वभावस्य परमकारुणिकस्य जगत्कंपनहेतु-
त्वमयुक्तं: तस्मादुक्तश्रुतेरस्यानिः कंपनहेतुः यद्वा प्राणाणपुः कंपनहेतुः प्राणश्रुतेः प्राणाना
योर्हि हृच्चलनहेतुत्वेन प्राणानिमित्ते सर्वमिह स्वजगच्छरीरस्पंदचलतीति: यदिदं किंच जगत्सर्वं प्रा
णऽएजतीति निःसृतं ॥ इत्यस्यानन्वोपपत्तेः वायुनिमित्तमेव विद्युत्स्तनयित्नुवृष्टिवन्महाभयहेतु
रशनिरपि विवर्तत इति ॥ महद्भयं वज्रमुद्यतं ॥ इत्यस्यापि तत्त्वोपपत्तेः वायुरेव बाह्येष्वपुरे
वसमाष्ट्ररूपं त्रुनर्भूत्त्वं जगत्यां तिष्ठति यदेवं वेद ॥ इति श्रुतेर्वायुविज्ञानादमृतत्वोपपत्तेश्च इति प्राप्ते प
रमेश्वरं सर्वकंपनहेतुरिति ब्रूमः। परमेश्वरस्य सकलजगत्कंपनहेतुत्वं शासकत्वात् संभवति १८
यस्य शासनभयेन सर्वे स्वं स्वं निपिद्धं विसृत्वा विहितेषु प्रवर्तामहे यच्छासनभयादेव वायोरादी-
नां स्वस्वाधिकारप्रवृत्तिः भीषास्माद्वातः पवते ॥ इत्यादिष्वपगम्यते: कल्याणमूर्तिरेव परमेश्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रः शासकतया भयदर्शनो भवति। ननु श्रूयते॥ तस्माद्व्राजमुखं भीषं भावुकं॥ इति। तस्मात्
स्वामितया सकलजगत्कंपहेतुरीश्वर एव॥४०॥ ॥दहराद्युपास्यतया निर्दिष्टस्य परमेश्वर
स्य प्राप्यत्वमुपपादयितुमधिकरणांतरमारभ्यते॥ ॥ज्योतिर्दर्शनात्॥४१॥ ॥छांदोग्ये
ऽस्य प्रजापतिविद्यायामाम्नायते विषयः।२ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुप
संपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः॥ इति मुक्तप्राप्यतया श्रूयमाणं परं ज्योतिः परमे
श्वरः किं वा नारायणो मूर्त्यात्मेति संशयः। उत्तमः पुरुष इति मुक्तप्राप्यस्य परंज्योतिषः पुरुषात्म
शब्दसमानाधिकरण्यात्परं ज्योतिरिति प्राप्ते ब्रूमः। मुक्तप्राप्यं परं ज्योतिरिह परमशिवाभिधानं प
रंब्रह्म। ननु श्रामानामेवानावृत्तिदर्शनात्। परब्रह्मणोऽन्यत्श्राभानां कथमनावृत्तिः संभविता।

१- एजति॥ इत्यादिना प्राणशब्दनिर्दिष्टजनितभयात्सकलजगत्कंपनमुच्यते। तत्र भूतकंपनहेतुः प
रमेश्वरोऽन्यो वेति संशये परमेश्वरस्य सकलजगद्भयप्रदस्य समस्तस्वभावस्य जगत्कंपनहेतुत्वमयु
क्तमिति प्राप्ते ब्रूमः। परमेश्वरस्येति पा०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पुरुषोत्तमशब्दो नारायणे रूढोऽपि ब्रह्मण्यपि वर्त्तते । पुरुषेभ्योऽधिकत्वात् । ब्रह्ममेधकल्पेऽपि ॥
वृष्टितुं पुरुषोत्तमं ॥ इति नामान्यपरब्रह्मणः पर्यायत्वेन पुरुषोत्तमशब्दस्य प्रयोगात् । परं ब्रह्मैव परं
ज्योतिः ॥४१॥ ॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥४२॥ ॥ छांदोग्ये श्रूयते । स्वाविष
यः । आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा ॥ इति । अत्र नाम
रूपयोर्निर्वोढृत्वेन श्रूयमाणः सन्नाकाशः परमेश्वरो विषयहाजीवो वेति संशयः । सर्वभूतावका
शप्रदानेन नामरूपनिर्वोढृत्वस्यापि संभवात् । विषयविहाकाशः । अथवा जीवः । अनेन जी
वेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि ॥ इति तस्य नामरूपव्याकरणसंबंधदर्शनात् । इत्येवं प्रा
प्ते ब्रूमः । परमेश्वर एवात्राकाशशब्देन नामरूपनिर्वोढा श्रूयते । अर्थान्तरत्वादितद्धर्मव्यपदेशात् ।
न ह्याकाशेऽर्थान्तरत्वादिकं संभवति जीवे वा । अतः परमेश्वर एवाकाशशब्दवाच्यः ॥४२॥ ॥ ननु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्त्वमसि॥ इत्यादिनैकत्वव्यपदेशान्न प्रत्यगात्मनोऽर्थान्तरभूतः परमेश्वरोऽस्तीत्याशंक्याह॥ ॥
सुषुप्त्युत्क्रान्त्योर्भेदेन॥४३॥ ॥प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरं॥ प्राज्ञेना
त्मनान्वारूढ उत्सर्जन्याति॥ इति सुषुप्त्युत्क्रान्त्योर्जीवान्तरविषयत्वान्नशक्त्याज्ञानात् तदानीमेव
प्राज्ञेन यो भेदेन व्यपदेशाज्जीवादर्थान्तरभूतः परमेश्वरोऽस्ति। स एवात्राकाशशब्दवाच्यः॥४३॥ ॥
पत्यादिशब्देभ्यः॥४४॥ ॥परिष्वञ्जके प्राज्ञे श्रूयमाणेभ्यः पत्यादिशब्देभ्यश्चायमन्य एव जी
वादित्यवगम्यते। स सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः स न साधुना कर्मणा भूयान्नो ए
वासाधुना कनीयान् एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल॥ इत्यादिकं पुनरत्र हि श्रूयते॥ पशू
नां पतये रुद्राणां पतये॥ इत्यादिभिश्च परमेश्वरस्य जगदाधिपत्यं प्रसिद्धं न तु जीवस्य। त
स्मादयं जीवादन्यः परमेश्वर एवात्राकाशशब्दवाच्यः॥४४॥ ॥इति श्रीकंठशिवाचार्यविरचि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ते ब्रह्ममीमांसाभाष्ये प्रथमाध्यायस्य तृतीयः पादः ॥३॥ ॥ॐ तत्सत् ॥ ॥श्रीकाशीविश्वेश्वर

इति व्याससूत्रीयब्रह्ममीमांसाशैवभाष्यस्य प्रथमाऽध्यायस्य तृती
यपादः समाप्तः ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri